# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| कक्षा-आचार्य(SEM-3)(New&Old) | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – साहित्यम् (काव्यवर्गः) | **कोड –C.C.5.3.9 (3)** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – नैषधीयचरितम् | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ प्रदत्तयोः श्लोकस्याप्येकस्य ससन्दर्भं व्याख्यायताम् ।** ५

१ अमुष्य विद्या रसनाऽग्रनर्तकी त्रयीव नीताऽङ्गगुणेन विस्तरम् ।
अगाहताऽष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयाश्रियाम् ॥

२ सितांशुवर्णैर्वयति स्म तद्गुणैमहाऽशिवेम्नः सहकृत्वरी बहुम् ।
दिगङ्गनाऽङ्गभरणं रणाङ्गणे यशः पटं तद्भटचातुरी तुरी ॥

**प्रश्न २ अधोलिखितयोः कश्चिदेकः प्रश्नः यथार्थ्येन साध्यः ।** १०

१ महाकाव्यलक्षणं विलिख्य तस्य नैषधीयचरिते सद्भावः प्रतिपाद्यः ।

२ महाकवेः श्रीहर्षस्य रसच्छन्दोऽलङ्कारभाव विवेच्यताम् ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ कस्चिदेकः श्लोकः ससन्दर्भं व्याख्येयः ।** ५

१ किमस्य रोम्णाङ्कपटेन कोटिभिर्विधिर्न लेखाभिरजीगणद् गुणान् ।
न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः ॥

२ अलं नलं रोद्धुंममी किलाऽभवन्गुणा विवेक प्रभवा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्ग-निसर्ग ईदृशः ॥

**प्रश्न ४ यथेच्छ कश्चिदेकः प्रश्नः साध्यः ।** १०

१ राज्ञो नलस्य चरितं नैषधीयचरितानुसारेण वर्ण्यताम् ।

२ नल-दम्पत्ययोः पूर्वरागं वर्ण्यताम् ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोप्रदत्तस्य कस्याप्येकस्य श्लोकस्य व्याख्यायनं विधेयम्।** ५

१ मृगया न विगीयते नृपैरपि धर्माऽऽगममर्मपारगैः।
स्मर सुन्दर ! मां यदत्यजस्तव धर्मः स दयोदयोज्ज्वलः॥

२ भृशतापभृता मया भवान् मरुदासादि तुषारसारवान्।
धनिनामितरः सतां पुनर्गुणवत्सन्निधिरेव सन्निधिः॥

**प्रश्न ६ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ नैषधीयचरितानुसारेण हंसस्य कुण्डिनपुर प्रस्थानयात्रा सरलसंस्कृतेन लिखत।

२ "तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम्" इति सूक्तिरियं सप्रसङ्गं विशदीकृत्य वर्णयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ काम्येकां सूक्तिं वर्णयत।** ५

१ अहेलिना किं नलिनी विधते सुधाकरेणाऽपि सुधाकरेण।

२ गुरुप्रदेशं प्रतिमेव तीक्ष्णा प्रतीक्षते जातु न कालमतिः।

**प्रश्न ८ यथेच्छमेकः प्रश्नः साध्यः।** १०

१ हंसस्य कथनानुसारेण नलस्य अनुरागं वर्ण्यताम्।

२ तृतीयसर्गस्य सारांशं सरलसंस्कृतेन लिखत।

**प्रश्न ९ अधोलिखितेषु प्रश्नेषु यथेच्छं दश प्रश्ना: समाधेया:।** १०

१ महाकवेः श्रीहर्षस्य पितुः किं नामासीत् ?

२ श्रीहर्षः कस्य राज्यस्य सभापण्डितः आसीत् ?

३ नैषधीयचरिते कति सर्गाः सन्ति ?

४ कदा क्व माघः क्वं च भारविः ?

५ नैषधीयचरिते का नायिका ?

६ किं विद्वदौषधम् ?

७ नैषधीयचरिते प्रथमसर्गे किं छन्दः प्रयुक्तम् ?

८ नलस्य वपुः किमालिङ्गत् ?
९ उपवने नलः किम् अपश्यत् ?
१० दमयत्याः कुत्र विरहाकुलः आसीत् ?
११ तव वत्मनी किं वर्तताम् ?
१२ द्वितीये सर्गे प्रधानरूपेण किं वृत्तं प्रयुक्तम् ?
१३ पदे पदे के सन्ति ?
१४ तृतीयसर्गे किं छन्दः प्रयुक्तम् ?
१५ नारदः किमर्थं त्रिंदशयाम जगाम ?